DIVYAYATAN
A JOURNAL OF LAKULISH YOGA UNIVERSITY

DIVYAYATAN -
A JOURNAL OF LAKULISH YOGA UNIVERSITY
Peer Reviewed Journal
E-ISSN: 3048-4928

# संस्कृतवाङ्मये मनोविज्ञानम्

**Dr. Hemant R. Patel**

Assistant Professor
Shree Somnath Sanskrit University, Veraval

वर्तमानकाले मनोविज्ञानमेकमतिमहत्वपूर्ण विज्ञानमस्ति। इदं मनोविज्ञानं PSYCHOLOGY वा इच्युच्यते । PSYCHOLOGY इति शब्दः Psyche, Logos चेति द्रयोः ग्रीकशब्दयोः योगेन निष्पन्नोऽस्ति। psyche इत्यास्यार्थः – आत्मनः,Logos इत्यस्य-अध्ययनमिति ।एवं Psychology इति शब्दस्य व्युत्पत्त्यनुसारेण मनोविज्ञानं दर्शनशास्त्रस्य शाखाऽऽसीत् किन्तु वर्तमानकाले मनोविज्ञानस्य तात्पर्य प्राणीनां व्यवहाराध्ययनमिति स्वीक्रियते। PSYCHOLOGY इत्यस्य भाषांतरपर्य़ायशब्दस्य मनोविज्ञानस्यार्थः भवति। मनसः विज्ञानम् अर्थात् मनसःतत्प्रक्रियाणाञ्च अध्ययनम्। यतः एताः मानसिकप्रकियाः व्यवहाररुपेण प्रक़टिताः भवन्ति अतःमनोविज्ञानस्यशयःव्यवहारस्य वैज्ञानिकमध्ययनमिति। भारतीय मनोविज्ञानस्य आधारशिला वैदिकग्रंथैःन्यस्ताऽऽसीत्। भारतीयमनोविज्ञानस्य आधुनिककालः कलकत्ताविश्वविधयालयस्य दर्शऩशास्त्रविभागे 1915 ख्रिष्टाब्दे प्रारब्धः, यत्र प्रथमा मनोविज्ञानप्रयोगशाला स्थापिताऽभवत्।

संस्कृतवाङ्मय ज्ञानविज्ञानयोःअपूर्वममूल्यच्च निधानमस्ति। अस्मिन् वाङ्मये विभिन्नशास्त्रैः मानवजीवनस्य सम्पूर्णतायाःकृते पुरुषार्थचतुष्टयस्य प्राप्त्युपायाः प्रतिपादिताः सन्ति । अत्र विश्वकल्याणाय स्वतंत्ररूपेण आनुषडिगरूपेण च बहूनि ज्ञानानुशासनानि विवेचितानि सन्ति। संस्कृतवाङमये स्वतंत्ररुपेण मनोविज्ञानग्रंथाः न लभ्यन्ते। तथापि आत्मविज्ञानप्रतिपादकग्रंथेषु बहुधा मनोविज्ञानसूत्राणि प्राप्यन्ते। वेदेषु उपनिषत्सु रामायण महाभारत योगसूत्र धर्मशास्त्र दर्शनशास्त्र ज्योतिषशास्त्रादिग्रन्थेषु मनसः प्रकृतिः कार्याणि च विचारितानि सन्ति। ऐते ग्रंथाःन केवलं धर्माध्यात्मप्रतिपादनपराः अपितु मानवव्यहारस्य सर्वे पक्षाः अत्र प्रकाशिताः सन्ति । महाभारतविषये स्वयं महाभारतकारः लिखति-

धर्म चार्थे च कामे च मोक्षे च भरतर्षभ।
यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् कचित्।। महाभारतम् 1.62.53

शुक्ल यजुर्वेदस्य चतुस्त्रिंशाध्यायस्य प्रारम्भिकषण्मंत्रेषु मनसः विषये गम्भीरतया विचारो विहितः।ऐते षणमन्त्राःशिवसंक्लपसूक्तनाम्ना प्रसिध्धाः सन्ति । अत्र मनसः विशेषतानां क्रियाकलापानाच्च वर्णनेन सह तत् कल्याणसंकल्पेन पूरयितुं प्रार्थना कृता वर्तते। यथा –

यस्मान्न ऋते किच्चन कर्म क्रयते तन्मे मनः शिवसंकल्पमस्तु । शुक्लयर्जुवेदः - 34.3

अथर्ववेदस्य एकस्मिन् मंत्रे सूत्ररुपेण मनोविज्ञानस्य सर्वेषां विषयाणामुल्लेखो लभ्यते ।

**मनसे चेतसे धिय,आकूतय उत चित्तये।**
**मत्यै श्रुताय चक्षसे, विधेम हविषा वयम्।। अथर्ववेदः 6.41.1**

अत्र मनसे इत्यतः संवेदना प्रेरणा च गृहीते स्तः।चेतसे इति पदेन चेतना-चिन्तने अभिप्रेते वर्तते । धिये इत्यनेन ध्यानमवधानं वा अभिप्रेतमस्ति। आकूतय इत्यतः अनुभूतेः संवेगस्य च ग्रहणमस्ति। चित्तये इत्यनेन चित्तधर्मः स्मरणं तदभावरुपं विस्मरणंच्च गृहीते स्तः। मत्यै इति पदेन बुध्धिः अभिप्रता वर्तते। श्रुताय इत्यतःश्रवणस्य पठनस्य शिक्षणस्य च ग्रहणमस्ति। चक्षसे इति पदेन चक्षुःकार्य-दर्शनं प्रत्यक्षीकरणं वा अभिप्रेतमस्ति।

ब्राह्मणग्रन्थेष्वपि मनोविज्ञानस्य बहूनि सूत्राणि विघन्ते, यस्मिन शतपथब्राह्मणं प्रमुखः अस्ति। अस्मिन् ब्राह्मणे एका अतिमहत्वपूर्णा वार्ता कथिता वर्तते। यत् कामः, संकल्पः, विचिकित्सा, श्रद्धा, अश्रद्धा, धृतिः, अधृतिः, धीः एतानि सर्वाणि तत्त्वानि मनसःएव विभिन्नरुपाणि सन्ति। शतपथब्राह्मण 14.4.3.9

उपनिषत्साहित्ये तु मनोविज्ञानस्य अधिकं वर्णनं मिलति। कठोपनिषदि आत्मनःशरीरस्य बुध्धेःमनसः इन्द्रियाणाच्च रथरुपकमाध्यमेन अतिव सुन्दरं वर्णनं लभ्यते -

**आत्मानं रथिनं विध्धि शरीरं रथमेव तु।**
**बुध्धिं तु सारथि विध्धि मनःप्रग्रहमेव च।।**
**इन्द्रियाणि हयानाहुर्विषयांस्तेषु गोचरान्।**
**आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनिषिणः।। कठोपनिषद् 1.3.3-4**

अमृतबिन्दूपनिषदि मनुष्याणां बन्धनमोक्षय़ः सुखदुःखयोश्र्च कारणं मन एव निदिष्टम् –

मन एव मनुष्याणां कारणं बन्धमोक्षयोः । अमृतबिन्दुपनिषद् श्लोक-2

रामायणस्य पात्रं हनुमान् बुध्धिमान् वीरश्च किन्तु यावत् जाम्बवता सः स्वस्योङ्डयनसामर्थयं न स्मारतिः तावत् सः सामर्थ्येन अपरिचितः अतिष्ठत् । घटनेषा रोगिणा सह तुलनीयाऽस्ति यस्य सवात्मविश्वासः नष्टः।अधुना तस्य स्वान्तर्निहितक्षमताः स्मारयितुं तज्जीवनं परिवर्तयितुं च प्रसङ्गोऽयं एन.एन.विगमहोदयेन हनुमान् कोम्प्लेक्स इति रुपेण नामितः। मनोविज्ञानजगति श्रीमदभगवदगीतायाः श्रीकृष्णस्य अतिव आदरोऽस्ति । भगवान् श्रीकृष्णः विश्वस्य प्रथमः मनोचिक्त्सिकः मन्यते । गीतायां मानसिकासन्तुलनं निराशामवसादज्च प्राप्तवतः अर्जुनस्य मनोविज्ञानिकसमाधानं कृतमस्ति।

संस्कृतवाङ्मये बहुषु स्थेलेषु मनोवैज्ञानिकसमाधानरुपेण नर-नारायणसंवादः, गुरु-शिष्यसंवादः, पति-पत्नीसंवादः इत्यादयः उपलभ्यते। पञ्चतन्त्रस्य हितोपदेशस्य च कथाः प्राच्यमनोविज्ञानस्य सूक्ष्मताः दर्शयति। संस्कृतसुभाषितसाहित्ये तु प्राचीनमनोविज्ञानाशाः सरसरीत्या प्रतिपादिताः सन्ति । साहित्यशास्त्रस्य औचित्यसिध्धान्तः रससिध्धान्तश्च मनोविज्ञानस्य दिग्दर्शनं कारयति। कवेर्व्युत्पत्तिज्ञाने मनोविज्ञानमपि आवश्यकमस्ति,विना मनोविज्ञान ज्ञानेन काऽपि काव्यरचना असम्भावा,अतः विशालसंस्कृतसाहित्यं मनोविज्ञानसूत्राणां भाण्डारमस्ति । साहित्यशास्त्रे स्थाय़िभावानां यऩ्निरूपेणं कृतमस्ति तद्रिशुध्धमनोवैज्ञानिकाधारेण विहितमस्ति ।आधुनिकमनोविज्ञानं मूल- प्रवृत्तिभिः सम्बध्दान् यान् मनःसंवेगाः इति वदति,ते एव साहित्यशास्त्रे स्थायीभावाःइति नाम्ना उत्कारसन्ति । संस्कृतसाहित्ये मनसःसदसद्त्योर्मध्ये युध्धदर्शकं कृष्णमिश्रविरचितं प्रबोधचन्द्रोदयनामकम् अद्भुतमेकं नाटकं मिलति, यस्मिन् विवेक-मति-करुणा-क्षमासद्रशानि सत्पात्राणि किञ्च अहंकार महामोह-काम-लोभ-हिंसा-दंभसद्रशानि अत्पात्राणि सन्ति।मनोविज्ञानविषय़ोऽत्र सरसशैल्या प्रबोधितो वर्तते।



© 2025 by Author

भारतीयदर्शनपरम्परायामपि मनोविषये बहुविचारः कृतोऽस्ति,यस्मिन योगदर्शनं प्रमुख्यं धत्ते।दर्शनमिदं योगस्य परिभाषैव चित्तवृत्तिनां निरोधकरणं स्वीकरोति तथा च अस्योपायान् विस्तृतं विवेचयति । वैशेषिकदर्शने सुख-दुखादीनां प्राप्तिसाधनमिन्द्रियं मनःउच्यते । वेदान्तदर्शने मनः अन्तःकरणस्य संकल्पविकल्पात्मकवृत्तिः कथितमस्ति ।सांख्यदर्शने मनसः उत्पतिः अहंकारतत्त्वात् स्वीकृता वर्तते ।

ज्योतिष-वास्तु-शकुन-सामुद्रिकशास्त्रैः सहापि मनोविज्ञानस्य अन्तःसम्बन्धःतिष्ठति। यथोदाहारणं पश्यामः- ज्योतिषशास्त्रे मनसः कारकः चन्द्र उक्तःतथा च चन्द्रोत्पत्तिः विराटपुरुषस्य मनसः अङ्गीकृता वर्तते ।अपरत्र आधुनिकमनोवैज्ञानिकैः पूर्णिमादिवसे मनोरोगिणां कृते मानसिकरोगाणां वृद्धिः स्वीक्रियते ।एवं प्रातःकालीनसूर्यकिरणानां पूर्वमुखिभवनेषु प्रसारणत्वात् तत्रत्यवास्तव्याः सकारात्मकोर्जया परिपूर्णाः भवन्ति । शकुनशास्त्रस्यैषा वार्ताऽपि मनोवैज्ञानिकः अङ्गीकृता भवेघत यात्राप्रस्थानसमये वाघयन्त्राणां मधुरध्वनिः, मङ्गलगीतगानं, नकुपदर्शनं, प्रक्षालितवस्त्राणि वहन् रजकः इत्यादीनि शुभशकुनानि तथा च गृहक्लेशः, गृहदाहः,महिषाणां मार्जारीणाञ्च युध्दं,सर्पविलोकनम् इत्यादीनि अशुभशकुनानि क्रमेण पथिके सकारात्मकभावानां नकारात्मकभावानाञ्च संचरणं कुर्वन्ति। सामुद्रिकशास्त्रमनोविज्ञानयोः अन्तः सम्बन्धविषये मनुस्मृतेः श्लोकोऽयं प्रसिद्धः वर्तते -

आकारैरिङ्गितैर्गत्या चेष्टया भाषितेन च।
नेत्रवक्रविकारैश्च गृह्यतेऽन्तर्गतं मनः।। मनुस्मृतिः8.26

शुद्रकविरचिते मृच्छक्टिक प्रकरणेऽपि नायकस्य चारुदतस्य निरपराधताविषये न्यायालयाधिकरणिकः एवमनुमिनोति-

अधिकरणिकः - अयमसौ चारुदत्तः। य एषः घोणोन्नतं मुखमपाङ्ग विशालनेत्र नैतध्दि भाजनमकारणदूषणानाम्। नागेषु गोषु तुरगेषु तथा नरेषु न ह्याकृतिः सुसदृशं विजहाति वृतम्।। मृच्छकटिकम् 9.16

अस्माकं पूर्वजानां एतादशी समृध्धा वैज्ञानिकज्ञानपरम्परा अस्ति तथापि वयं पाश्चात्त्यसंस्कृतेः वर्धमानेन अन्धानुकरणेन स्वमूलात् दुरं गच्छामः। भारतस्य जनसंख्यायां एकः बृहभ्दागः युनामस्ति ।विभिन्नानां शोधनुसन्धानामाधारेण तथ्यमेतत् स्पष्टतां याति यद् भारतीययुववर्गे मनोविदलता, मनस्तापः, मनः सन्नायु विकृतिः दुश्चिन्ता, अवसादः, कुण्ठा, निम्नात्मप्रत्ययः, उन्मादः, आत्महननप्रवृत्तिः, स्मृतिक्षयः, इत्यादयः, मानसिकस्वास्थ्य समस्याः वर्ध्दिताः सन्ति। राष्ट्रिय-मानसिक-सर्वेक्षणम् 2016 इत्यनुसारं भारतीयजनसंख्यायामनुमानेन पञ्चदशप्रतिशतात्मकजनसंख्याः कृते सक्रियमानसिकस्वास्थ्यहस्तक्षेपस्य सहायतायाः वा आवश्यकता वर्तते। कोरोनामहामारीकाले मानसिकव्याध्यः इतोऽपि वर्ध्दिताः सन्ति। निराशा, कुण्ठा इत्यादिषु अप्रत्याशितरुपेण वृध्दिरागता। अधुनाऽपि भारते मानसिकस्वास्थ्यं तादृशं महत्त्वं न बिभर्ति य़ाद्शमेतत् महत्त्वपूर्णमस्ति।अत्याधिकं विचारणीयं तथ्यमिदमस्ति यत् मानसिकस्वास्थ्यमहत्ता अवगता भवेत् तथा च तस्योन्नत्यै प्रभाविनःउपायाः करणीयाः स्युः।

## सन्दर्भग्रंथा

महाभारतम् - गीताप्रेस गोरखपुरम्, 2020
यजुर्वेद - संस्कृत साहित्यप्रकाशनम् नव देहली, 2015
अथर्ववेदः- संस्कृत साहित्यप्रकाशनम् नव देहली, 2015
वैदिक मनोविज्ञान – कपिलदेव द्विवेदी,विश्वभारती अनुसंधान परिषद् भदोही, 2018
शतपथब्राह्मणम्- संस्कृत साहित्यप्रकाशनम्, नव देहली, 2015
कठोपनिषद् – गीताप्रेस गोरखपुरम् , 2017
अमृतबिन्दूपनिषद् – मिनर्ण प्रेस, मद्रास , 1998
गीतादर्शन – ओशो, दिव्याश पब्लिकेशन, 2018
संस्कृत साहित्य का इतिहास –चोखम्भा प्रकाशन वाराणसी, 2017
तर्कसंग्रहः – चौखम्भा प्रकाशन, वाराणसी, 2012
योगसूत्रम् – रणधीर प्रकाशन, हरिद्वारम् , 1997
सांखयकारिका – चौखम्भा प्रकाशन् वाराणसी,1990
लधुजातकम् – ठाकुरप्रसादपुस्तकमन्दिरम्, 1882
मनुस्मृतिः- चौखम्भा प्रकाशन, वाराणसी- 2011
मृच्छकटिकम्- चौखम्भा प्रकाशन, वाराणसी, 2009
National mental Health Survey of India ,2015-16


© 2025 by Author